हिताच्च तङ्। शास्त्रार्थवेदनेनैव सम्माने तत्त्वनिश्चये। उत्क्षेपणे प्रार्थने च ऋणनिर्यातने तथा। अन्तिकप्रापणे भृत्यां व्यये चापनये तथा। अमूर्त्ते कर्त्तृगे कर्मण्येषु तङ् नयतेर्भवेत्। उत्साहे चाप्रहितौ वृद्धौ च क्रमतेस्तु तङ्। परोपाभ्याञ्च तरार्थे तङाङोज्योतिरुद्गमे। प्रोपाभ्यां तङ् समारम्भे वेः पादचलनार्थकात्। विभाषया क्रमेस्तङ् स्यादुपसर्गविवर्ज्जितात्। निह्नवे ज्ञोऽकर्मकाच्च संप्रतिभ्यामचिन्तने। यत्ने च ज्ञानपूर्व्वोक्तौ विमतावुपसान्त्वने। प्रार्थने च वदेर्व्यक्ते संभूयोच्चारणे तु तङ्। अनोरकर्मकाद्व्यक्ते सहोक्ते विमते तु वा। अवाद्गिरः कर्त्तरि तङ् प्रतिज्ञायां समस्तथा। उदश्चरः कर्म्मयुक्तात् समोयुक्तात् तृतीयया। तृतीया चेच्चतुर्थ्यर्थे दाणः संपूर्व्वकात्तु तङ्। ज्ञाश्रुस्मृदृश्यतेश्च स्यात् सनन्तात्कर्त्तरीष्यते। अनोर्जिज्ञासतेनैव प्रत्याङ्भ्याञ्च तथा श्रुवः। स्वराद्यन्तोपसर्गात्तङ् युजेर्न यज्ञपात्रके। अपालने भुजेस्तङ् स्यात् क्ष्णुवः संपूर्व्वकात्तु तङ्। अस्त्यर्थस्य धातोर्यत् कर्म्माण्यन्तस्य चेद्भवेत्। ण्यन्तस्य कर्त्ता स, तदा तस्मात् ण्यन्तात् भवेत्तु तङ्। णिजन्ताच्च गृधेर्वञ्चेः प्रतारार्थे तु तङ् भवेत्। कविकल्पद्रुमग्रन्थे ञित्त्वेन पठितास्तु ये। णिजन्तास्तोभयपदास्तेभ्यस्तङ् कर्तृगे फले। अपाद्वदोयमोऽग्रन्थे समुदाङ्भ्यस्तथैव तङ्। उपसर्गाद्दते ज्ञस्य तथा तङ् कर्त्तृगे फले। समीपस्थपदेनैव कर्त्तृगस्य फलस्य चेत्। द्योतनं स्यात्तदा तत्र तङ् कर्त्तरि विभाषया" उदाहरणं तत्रैव दृश्यम्। "परस्मैपदमिच्छन्ति आत्मनेपदिनः क्वचित्" व्या॰कारिका। [स॰। व्याकरणप्रसिद्धे आत्मनेपदशब्दार्थे।

**आत्मनेभाषा** स्त्री आत्मने तदुद्देशेन भाषा परिभाषा अलुक्

**आत्मन्वत्** त्रि॰ आत्माऽस्त्यस्य मतुप् वेदे भत्वात् न नलोपः स्त्रियां ङीप्। १आत्मविशिष्टे "तमूहथुर्नौभिरात्मन्वतीभिः" ऋ॰ १,११६,३। "आत्मन्वन्नभोदुह्यते घृतं पयः" ऋ॰ ९,७४,४। लोके तु आत्मवान् इत्येव। २यत्नवति ३सुमनस्के च त्रि॰ स्त्रियां ङीप्।

**आत्मन्विन्** त्रि॰ आत्मन्+अस्त्यर्थे बा॰ विनि भत्वम्। मनस्विनि "तन्मनोऽकुरुतात्मन्वी स्यामिति" वृ॰उप॰ "आत्मन्वी मनस्वी" भा॰।

**आत्मपुराण** न॰ आत्मनः पुराणं सृष्ट्यादिकर्त्तृत्वादिरूपमितिवृत्तमधिकृत्य कृतो ग्रन्थः अण्। आत्मनोजगत्सृष्ट्यादिरूपेतिवृत्ताधिकारेण शङ्करापुन्दकृते अष्टादशाध्यायात्मके उपनिषदर्थप्रकाशके ग्रन्थभेदे। तत्र प्रतिपाद्यानि १अ॰ ऐतरेयोपनिषदर्थविवृतिः। २ अ॰ वृहदारण्यस्य कौषीतकिब्राह्मणार्थविवृतिः। ३अ॰ वृ॰ गार्ग्यजातशत्रुसंवादार्थविवृतिः। ४ अ॰ वृ॰ मधुकाण्डार्थविवृतिः। ५अ॰ वृ॰ याज्ञवल्क्यकाण्डार्थविवृतिः। ६अ॰वृ॰ याज्ञवल्क्यजनकसंवादार्थविवृतिः। ७अ॰ वृ॰ याज्ञवल्क्यमैत्रेयीसंवादार्थविवृतिः। ८अ॰ श्वेताश्वतरोपनिषदर्थविवृतिः। ९ अ॰ काठकोपनिषदर्थविवृतिः। १० अ॰ तैत्तिरीयोपनिषदर्थविवृतिः। ११अ॰ गर्भाद्युपनिषदर्थविवृतिः। १२ अ॰ छान्दोग्यस्य श्वेतकेतुसंवादार्थविवृतिः। १३ अ॰ छा॰ सनत्कुमारनारदसंवादार्थविवृतिः। १४ अ॰छा॰ प्रजापतीन्द्रसंवादार्थविवृतिः। १५अ॰ तलवकारोपनिषदर्थविवृतिः। १६ अ॰ मुण्डकोपनिषदर्थविवृतिः। १७अ॰ प्रश्नोपनिषदर्थविवृतिः। १८अ॰ माण्डूक्यशाजावालिप्रभृतीनामुपनिषदां सारांशार्थविवृतिः। एतत्पुराणञ्च सुगमोपायेन वेदान्तमतज्ञानार्थमतीवोपयोगि विवृतञ्चैतत् काकारामशास्त्रिणा ततएव तत्रत्याशेषार्थाः सुग्रहाः।

**आत्मप्रकाश** त्रि॰ आत्मनः प्रकाशः। आत्मनश्चैतन्यस्य पदार्थावभासनरूपे प्रकाशे। "आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम्। नाग्न्यादिदीपवद्दीप्तिर्भवत्यान्ध्यं यतो निशि" इत्युक्तेः अग्न्यादिप्रकाशविलक्षणनित्यप्रकाशत्वेन तत्प्रकाशेनैव घटादिस्फुरणेन च तस्य तथात्वम्। "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम्। तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत्" इत्युक्तेस्तस्य सर्वप्रकाशकत्वम्।

**आत्मप्रभ** त्रि॰ आत्मना स्वयमितरनैरपेक्ष्येण प्रभा यस्य। १स्वयंप्रकाशमाने "लोकानात्मप्रभान् पश्यन् फाल्गुनोविस्मयान्वितः" भा॰व॰प॰४२अ॰। २परमात्मनि पु॰ "हृद्यन्तः स्वयं ज्योतिरिति" श्रुतेः "न तद्भासयते सूर्य्यो न शशाङ्को न पावक" इत्युक्तेश्च तस्य भासने इतरापेक्षाभावात्तस्य तथात्वम्। ३त॰। ३स्वयंप्रभायां स्वयं प्रकाशे स्त्री।

**आत्मप्रभव** पु॰ प्रभवत्यस्मात् प्र+भू—अपादाने अप् आत्मा देहः मनो वा प्रभवो यस्य। १तनुजे पुत्रे मनोभवे २कामे च ३कन्यायां ४बुद्धौ च स्त्री आत्मभवादयोऽप्यत्र। ५आकाशादिषु च च परमात्मनः प्रभवत्वात्तेषां तथात्वम्।

**आत्मबन्धु** पु॰ आत्मनो बन्धुः। १आत्ममित्रे "आत्ममातुःस्वसुः पुत्राः आत्मपितुःस्वसुः सुताः। आत्ममातुलपुत्राश्च विज्ञेयाह्यात्मबान्धवाः २इत्युक्ते" मातृपितृस्वस्रोः २पुत्रे ३मातुलपुत्रे च। "पत्नीदुहितरश्चैव पितरौ भ्रातर-